पंजीकरण सं० ४२९६/६४ दूरभाष :— ४२३२४

बिहार प्रान्तीय (राज्य) संस्कृतसाहित्यसम्मेलनस्य

त्रैमासिकं मुखपत्रम्

संस्कृत—सम्मेलनम्

त्रयोविंशतितमे	(२३)	वार्षिकं मूल्यम् —	१०—००
द्वितीयोऽङ्कः	(२)	एकस्याङ्कस्य —	२—५०
वैक्रमाब्दः	२०४३	खृष्टाब्दः —	(१९८६)
ज्येष्ठ	(मासाङ्कः)	जून —	मासाङ्कः

संरक्षकमण्डलम्

आचार्य देवेन्द्र नाथ शर्मा, श्री ब्रह्मदत्त द्विवेदी, डा० सुरेन्द्र ब्रह्मचारी, स्वामी वासुदेवाचारी, डा० फणीन्द्र नाथ ओझा, श्री आद्याचरण झा, डा० रामावतार शर्मा, श्री महावीरप्रसाद मुरारका, श्री कमलाप्रसाद मुरारका

—सम्पादक मण्डलम्—

डा० वाचस्पति द्विवेदी, डा० चन्द्रभानु त्रिपाठी, श्री किशोरनाथ झा
आचार्य श्री शिवपूजन त्रिपाठी

॥ प्रधान सम्पादकः ॥

श्री चन्द्र दीप शुक्लः

उद्गमस्थानम्

श्री रामनिरञ्जनदासमुरारकासंस्कृतमहाविद्यालयः,
चौक पटना सिटी पटना—८ (विहार)

क्रमांङ्कः	विषयाः	लेखकाः	पृष्ठानि
१.	मङ्गलाचरण		
२.	मानवजन्मनः सार्थक्यम्	—पं० तारणीश झा, प्रयाग	१
३.	व्यंग्य पद्यानि	—डॉ० प्रशस्य मित्र शास्त्री	३
४.	भुवनवन्दितं भातु भारतम्	—वैद्य रामस्वरूप शास्त्री	४
५.	राजपुरुष इत्यत्र स्वत्वभानप्रक्रिया विवेचनम्	—श्री रमाकान्त मिश्रः, प्रयाग	५
६.	वाणीं भजत गीर्वाणीम्	—श्री फूल कुमार झा, मधुवनी	७
७.	इन्द्राणी	—डॉ० शैलजा पाण्डेय	८
८.	गणेशस्तुतिः	—पं० उमारमण झा, कश्मीर	११
९.	उद्घाटनभाषणम्	—पं० आद्याचरण झा	१२
१०.	आश्रम शुकः	—पं० रामस्वरूप शास्त्री	१७
११.	ममर्मूतिमत् पौरुषम्	—डॉ० प्रशस्यमित्र शास्त्री	१८



॥ श्रीः ॥

संस्कृत-सम्मेलनम्

त्रयोविंशतितमे (२३)	ज्येष्ठमासाङ्कः	जून अङ्कः
द्वितीयोऽङ्कः (२)	वैक्रमाब्दः २०४३	१९८६ खृष्टाब्दः

शैलानुजाताऽपि दयार्द्रभावा
भार्याऽपि तुग्रस्य सुशान्तिकर्त्री ।
विघ्नेशमाताऽपि च विघ्नहन्त्री
भूयादपर्णा मम नित्यभूत्यै ॥

{ श्री दुर्गाप्रसादत्रिपाठिनो
दुर्गास्तोत्रात् }

वर्षा-वर्णनम्

क्षपां क्षामीकृत्य प्रसभमपहृत्याम्बु सरितां
प्रताप्योर्वीं कृत्स्नां तरुगहनमुच्छोष्य सकलम् ।
क्व सम्प्रत्युष्णांशुर्गत इति तदन्वेषणपरा-
स्तडिद्दीपालोका दिशि दिशि चरन्तीव जलदाः ॥

(महर्षिपाणिनेः)

नभोऽवगाहाः परिलुप्तदाहाश्चलन्ति रंहोगतयोऽम्बुवाहाः ।
नभो मुरारेस्तनुतापहन्त्र्याः कलिन्दपुत्र्या इव किं प्रवाहः ॥

(लक्ष्मणस्य)

घनतरघनवृन्दच्छादिते व्योम्नि लोके
सवितुरथ सुधांशोः संकथैव व्यरंसीत् ।
विरहमनुभवन्ती सङ्गमं चापि भर्त्रा
रजनिदिवसभेदं चक्रवाकी शशंस ॥

(अम्बष्ठस्य)

नभो नवीनैर्जलदैः समावृतं
न दृश्यते चण्डमरीचिचण्डिमा ।
निशा निराशा शिशिरांशुशोभया
पतन्ति भूमौ प्रथमोदबिन्दवः ॥

(चन्द्रभानोस्त्रिपाठिनः)

मानवजन्मनः सार्थक्यम्

तारिणीश झा, व्याकरणवेदान्ताचार्य
पुराण विभागाध्यक्ष, हिं० सा० सम्मेलन, प्रयाग

मानवजन्म तदैव सार्थकं भवति यदा पुनर्जन्म न जायते। अतएव पुनर्जन्म निरोद्धुं नरो महान्तं प्रयत्नं कुर्वीत। कथितमप्यभियुक्तैः—

'प्राप्ता नृजातिं त्विह ये च जन्तवो,
ज्ञानक्रियाद्रव्यकलापसंभृताम्।
न वै यतेरन्नपुनर्भवाय ते,
भूयो वनौका इव यान्ति बन्धनम्॥'

अर्थाज्ज्ञानकर्मादिसंवलितां मनुष्यजनिं प्राप्य ये देहिनः पुनर्जन्माभावाय न प्रयतन्ते ते वन्यपशुपक्षिण इव बन्धनं प्राप्नुवन्ति।

शास्त्रेषु मनुष्ययोनिः सर्वश्रेष्ठा मता—'गुह्यं ब्रह्म तदिदं ब्रवीमि नहि मानुषात् श्रेष्ठतरं हि किञ्चित्' इति भारते। यतो हि मनुष्ययोनावेव ज्ञानप्राप्तिर्भवति तथा ज्ञानमन्तरा मोक्षो न मिलति—'ऋते ज्ञानान्न मुक्तिः'। प्राप्ते मोक्षे पुनर्जन्म न जायते। अतएव पुनर्जन्म निवारयितुं मोक्षोऽपेक्ष्यते, मोक्षाय च ज्ञानमनिवार्यम्। उक्तं च नीतिशास्त्रे—

'आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।
ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः॥

अर्थादाहारनिद्राभयमैथुनानि पशवो नराश्च कुर्वन्ति, नात्रोभयोर्विशेषः। परन्तु मानवेषु ज्ञानमधिको विशेषो भवति। येषु नरेषु ज्ञानं नास्ति ते पशुतुल्या एव। देवीभागवतमपि प्रकारान्तरेण समर्थयतीदं तथ्यम्—

'जिह्वोपस्थरसो राजन् पशुयोनिषु वर्तते।
ज्ञानं मानुषदेहे वै नान्यासु च कुयोनिषु॥'

अत्रेदं विचार्यताम्—ज्ञानं किमस्ति? अमरकोशो निर्दिशति मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। अनेन सिध्यति मन्मोक्षविषयिणी बुद्धिर्ज्ञानम्। एतादृशीबुद्धिर्ज्ञानेन वैराग्येण वा प्राप्यते। वैराग्यं च विषयान् प्रति दोषदृष्ट्याधानेन जायते। विषयेषु सर्वतो महीयान् वनिताविलास एव। अत्रेदमवधेयम्—यस्मिन् रमणीशरीररूपेऽग्नौ पुरुषः

शलभायते, तच्च शरीरं बाह्याभ्यन्तरतो मांसपिण्ड एव। स च विनश्वरः तस्मिन् का रमणीयता ?

'रक्तमांसमयस्यास्य सबाह्याभ्यन्तरे मुने ।
नाशैकधर्मिणो ब्रूहि कैव कायस्य रम्यता ॥

भर्तृहरिणाप्युक्तं वैराग्यशतके—

'स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ,
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरस्पर्धि जघनम्,
परं निन्द्यं रूपं कविजनविशेषैर्बहु कृतम् ॥'

अर्थात् स्त्रियाः स्तनौ मांसग्रन्थी एव, किन्तु कविभिस्तौ कनककलशाभ्यामुपमीयाकर्षकौ विहितौ। तस्याः मुखं लालाष्ठीवनयोर्निलयं, किन्तु कविभिश्चन्द्रेण तत्तुलितम्। जघनं स्रवन्मूत्रक्लिन्नं, किन्तु कविभिः दन्तावलशुण्डादण्डातिशायित्वेन तद्वर्णितम्। इत्थं रमणीरूपं परं निन्द्यं, किन्तु कविभिराकर्षकोपमाद्वारा तन्मनोहरं कृतम्।

इदमपि विचार्यतां यदिदं शरीरं त्वचायाः मांसस्य रुधिरस्य स्नायोः मेदसः मज्जायाः अस्थ्नः संघातो वर्तते तर्हि तस्मिन् रममाणानां जनानां विष्ठामूत्रपूयेषु क्रीडतां कृमीणां मध्ये कियदन्तरम् भवेत् ?

'त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ।
विण्मूत्रपूये रमतां कृमीणां कियदन्तरम् ॥

पुनरिदं शरीरं क्षणभङ्गुरमप्यस्ति, यथाह भर्तृहरिः—

'यदा मेरुः श्रीमान् निपतति युगान्ताग्निनिहतः,
समुद्राः शुष्यन्ति प्रचुरनिकरग्राहनिलयाः ।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता,
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥

अर्थात् यदा प्रलयकाले श्रीमान् मेरुपर्वतः युगान्ताग्निना दग्धो निपतति, प्रचुररत्नग्रहादिनिलयाः समुद्राः शुष्यन्ति, भूभृद्भिर्धृता धरापि विनाशमेति तदा करिकलभकर्णाग्रचंचलस्य शरीरस्याविनश्वरता कथं भवेत् ?

पुनरिदमप्यवधार्यताम्—यथाविष्ठाभोजनादुत्पद्यते अन्नकार्यत्वात्, तथैव शरीरमप्यन्नकार्यमस्ति। एवञ्च विष्ठां प्रति न कस्यचिदासक्तिर्भवति, तथैव शरीरं प्रत्यपि आसक्त्या न भाव्यम्—

'वर्चस्कं स्वन्नकार्यत्वाद्यथा कस्यापि न प्रियम् ।
तद्भागः सेन्द्रियो देहस्तद्वत् किमिति नेक्ष्यते ॥

वस्तुतस्तु विवेकिना पुरुषेण शरीरादिकमित्थं ज्ञातव्यम्—

शरीरं व्रणवत्पश्येदन्नं तु व्रणलेपनम् ।
व्रणसेचनवद्वारि वस्त्रं तु व्रणपट्टवत् ।।

अनेन प्रकारेण विषयसमूहं दोषदृष्ट्या दृष्ट्वा वैराग्यं सन्धार्य मानवजीवनं सफलं धन्यं च कार्यम् । अन्यथा पश्चात्ताप एव विधेयो भवेत्, तद्यथा—

'जन्मेदं बन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ।।

इत्थं वैराग्यपरकाः श्लोकाः शास्त्रपुराणेष्वाकीर्णाः । तेषां मननचिन्तनाभ्यां भाव्यम् । तदैव भोगासक्तिरपेता भवेत् । भोगासक्तिकारणादेवाद्यत्वे संसारेऽनर्थताण्डवं बोभूयते इति दिक् ।

डॉ० प्रशस्यमित्रशास्त्रिणां व्यंग्य पद्यानि

मृगाश्चरन्ति

शार्दूलदेवो गजराजसिंहः,
हरीश-नागेश्वर-राजहंसाः ।
आकर्ण्य नामानि विचारये यत्,
"मनुष्यरूपेण मृगाश्चरन्ति" ।।

स पन्थाः

भार्या अनेकास्तनयान् अनेकान्,
कुरुष्व निःशङ्कम् इहाऽपि काले ।
श्रीराम तातं स्मर कौरवेशम्,
"महाजनो येन गतः स पन्थाः" ।।

कोऽत्र दोषः ?

उत्कोचद्रव्यनिरतं नरमेति लक्ष्मीः,
त्याज्यं धनं तद् इति कापुरुषा वदन्ति ।
त्यक्त्वा भयं च कुरु यत्नम् इहाऽऽत्मशक्त्या,
"यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।।

भुवनवन्दितं भातु भारतम्

वैद्यः रामस्वरूप शास्त्री

सम्पादकः, बालसंस्कृतम्, बम्बई-४६

मुनिभिरर्चितं देवपूजितं
श्रुतिभिरूर्जितं शास्त्रचर्चितम् ।
प्रकृतिभूषितं ज्ञानसुन्दरं
भुवनवन्दितं भातु भारतम् ॥१॥

सुरसरित्तटं सिन्धुशोभितं
रुचिरपर्वतं कान्तकाननम् ।
कृषकसंकुलं सस्यसंभृतं
विपुलगोव्रजं भातु भारतम् ॥२॥

विविधबोधदैः सूरिभिश्चितं
विमलबुद्धिभिर्ज्ञानिभिर्युतम् ।
विततकीर्त्तिभिः कोविदैः स्तुतं
करुणमानसं भातु भारतम् ॥३॥

हरिनिषेवितं रामपावितं
मुरधरक्षितं व्यासवर्णितम् ।
त्रिदशगोगुरुब्राह्मणप्रियं
रचितराष्ट्रकं भातु भारतम् ॥४॥

विदितसंस्कृतं ख्यातकौशलं
विभवमण्डितं त्यागपण्डितम् ।
प्रयतमानुषं स्वर्ग भूतलं
सकल सुन्दरं भातु भारतम् ॥५॥

शमितशत्रुकं वैरिनिष्ठुरं
सुजनमित्रकं तुष्टजित्वरम् ।
विपुलसंम्पदं धर्म्मतत्परं
विदितविक्रमं भातु भारतम् ॥६॥

सरलसूनृतं ग्राम वैभवं
परम भावुकं भव्यमन्दिरम् ।
अनघकेतुकं स्वीयशासनं
भुवनवन्दितं भातु भारतम् ॥७॥

संस्कृतसम्मेलनम्

राजपुरुष इत्यत्र स्वत्वभानप्रक्रिया विवेचनम्

रमाकान्तमिश्रः

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्, प्रयागः

तार्किकशिरोमणिना भट्टगदाधरेण शाब्दबोधकारणनिर्धारणपरे स्वविरचिते व्युत्पत्तिवादे विषयोऽयं बहुविचारितः। गदाधरसिद्धान्तमधिकृत्यैवास्मिन् निबन्धे किञ्चिद वच्मि।

ननु राज्ञः पुरुष इत्यादौ स्वत्वादेः संसर्गतयैव भानमस्तु। अस्तु च स्वत्वसंसर्गकः राजप्रकारकः पुरुषविशेष्यकः स्वत्वसम्बन्धेन राजविशिष्टः पुरुषः इत्येव बोधः, मास्तु-स्वत्वादेः षष्ठ्यर्थत्वं प्रकारतयाभानञ्च। त्यज्यतां च नामार्थयोः भेदेन साक्षादन्वयबोधो नभवति इतिव्युत्पत्तिः। स्वत्वादेः प्रकारतया भानाङ्गीकारेहि तत्प्रतियोगिकस्याधिकस्यसंसर्गस्य शाब्दबोध विषयताकल्पनीया इत्येकं गौरवम्। तद्विषयिन्याः षष्ठीजन्योपस्थितेः शाब्दबोध-कारणताकल्पनीयेत्यपरं गौरवमिति चेत्।

मैवम्। उक्तगौरवसत्त्वेऽपि राज्ञः पुरुष इत्यादौ स्वत्वादेः प्रकारतया भानाङ्गीकारः एवोचितः। अन्यथा पुरुषो न राज्ञः इत्यत्र पुरुषे राजस्वत्वाभावबोधानुपपत्तिः।

यदि तु तत्र स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाव एव पुरुषे प्रतीयते न तु राजस्वत्वाभावः, वृत्त्यनियामकसम्बन्धस्यापि चात्यन्ताभावप्रतियोगितावच्छेदकत्वं स्वीक्रियते इत्युच्यते तदापि स्वत्वस्यप्रकारताभानाभ्युपगम एव ज्यायान्। अन्यथा राजस्वत्वाभाववान् पुरुषः सुन्दरः इत्याकारकं राजस्वत्वाभावविशिष्टपुरुषे सुन्दरत्व-वैशिष्टयस्यावगाहिप्रत्यक्षं प्रति राज्ञः पुरुषः वाक्यजन्यशाब्दसामग्र्याः प्रतिबन्धकत्वमधिकं कल्पनीयम् स्यादिति गौरवं स्वत्वादेः संसर्गतयाभानाभ्युपगमे। प्रकारतया भाने तु राज्ञः पुरुषः इति वाक्यजन्य शाब्दसामग्र्याः राजस्वत्वाभाववान् इत्याकारकबाधाभाविनश्चघटितत्वे-नास्याः सामग्रचाः सत्त्वे राजस्वत्वाभाववान् पुरुषः इत्याकारकस्य विशेष्यतावच्छेदक-प्रकारकस्य निश्चयस्यासंभवेन तादृशनिश्चयरूपकारणविरहादेव नोक्तविशिष्टवैशिष्ट्या-वगाहिप्रत्यक्षं भवति। विशिष्टवैशिष्टयावगाहिप्रत्यक्षे हि विशेष्यतावच्छेदकप्रकारकनिश्चयः कारणम्। अत उक्तशाब्दसामग्रचाः उक्तविशिष्टवैशिष्टयावगाहिप्रत्यक्षं प्रति प्रतिबन्धकत्वं न कल्पनीयं भवति।

ननु प्रकारतावादिनापि स्वत्वसम्बन्धेन राजाभाववान् पुरुषः सुन्दरः इत्याकारक-विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति राज्ञः इत्येतत् वाक्यजन्यशाब्दसामग्रचाः प्रतिबन्धकत्वं कल्पयीयम्। संसर्गतामते पुनः उक्तशाब्दसामग्र्याः राजाभाववान् पुरुषः इत्याकारक-बाधाभावनिश्चयघटितत्वेन तत्सत्वे विशेष्यतावच्छेदकीभूतराजाभावप्रकारकनिश्चयस्या-सम्भवेनविशेष्यतावच्छेदकप्रकारकनिश्चयरूपकारणविरहादेवोक्तविशिष्टवैशिष्टयावगाहिप्रत्यक्षं

न भवतीति तुल्यं प्रटिबद्धप्रतिबन्धकभावकृतं गौरवं मतद्वयेऽपि । परं कार्यकारणभावकृतं गौरवं प्रकारतावादिनां मते अधिकम् । यतः विभक्तिजन्यस्वत्वादुपस्थितेः राज्ञः पुरुषः इत्थमेतत् वाक्यजन्यबोधे कारणत्वं तं धिकं कल्पनीयमिति चेन्मैवम् ।

निरूपितत्त्वसम्बन्धावच्छिन्न प्रतियोगिताकराजाभाववत् स्वत्ववैशिष्टयावगाहि प्रत्यक्षं प्रतिराज्ञः पुरुषः वाक्यजन्य शाब्दसामग्र्याः या प्रतिबन्धकतासंसर्गतावादिभिः कल्पनीया तत्स्थानीयैव । राजस्वत्वाभाववान् पुरुषः सुन्दरः इतिविशिष्टवैशिष्टयावगाहि प्रत्यक्षं प्रत्यप्युक्तवाक्यजन्यशाब्दसामग्र्याः प्रतिबन्धकता कल्पनीयेति तामादाय संसर्गतामतेगौरवमतिरिच्यते । ननुप्रत्यक्षीयं प्रतिबध्य प्रतिबन्धकभावदृष्ट्यासंसर्गतामते गौरवस्यसत्त्वेऽपि अनुमितीयप्रतिबध्यप्रतिबन्धकभावदृष्टया लाघवस्यकार्यकारणभावदृष्ट्यालाघवस्य च सत्त्वेन संसर्गतामतमेव न्यायः । तथाहि-समानविषयकानुमितिं प्रति शाब्दसामग्री प्रतिबाधिका इतिसिद्धान्तः । एवं स्थिते प्रकारतामते राजकीयं स्वत्वं, राजस्वत्त्ववान् पुरुषः इति अनुमितिद्वयस्यापि राज्ञः पुरुष इतिवाक्यजन्यशाब्दबोधादनतिरिक्तविषयत्वेनसमानविषयकत्वेनोक्तानुमितिद्वयनिरूपितमुक्तशाब्दबोधसामग्र्यां प्रतिबन्धकताद्वयं कल्पनीयम् । संसर्गतामते तु उक्तानुमितिद्वयस्यापि राज्ञः पुरुषः इति वाक्यजन्य शाब्दबोधसमानविषयकत्वाभावेन शाब्दबोधसामग्र्यां उक्तानुमितिद्वयीय प्रतिबन्धकताद्वयं न कल्पनीयम् अपितु स्वत्वसम्बन्धेन राजविशिष्टः पुरुषः इत्याकारकैकविधानुमितिं प्रत्येवएकमेवप्रतिबन्धकत्वमास्थेयमिति लाघवम् । उक्तानुमितिद्वयसामग्र्यामुक्तशाब्दसामग्र्याञ्च सत्यामनुमितिरेव भवतीति चेन्मैवम् ।

यादृशशाब्दसामग्रीसत्त्वे यादृशानुमितिः संसर्गतावादिना स्वीक्रियते तादृशशाब्दसामग्रीसत्त्वे तादृशानुमितेः प्रकारतावादिनापि स्वीकारात् । प्रतिबन्धकताधिक्यस्य प्रकारतावादिमते अभावात् । अपि च संसर्गतावादिमते राजकीयं स्वत्वं राजस्वत्ववान् पुरुषः इतिवाक्यजन्यशाब्दबोधम्प्रति प्रतिबन्धकताद्वयस्य कल्पनीयत्वेन साम्यम् । संसर्गतामते हि उक्तवाक्यजन्यबोधस्योक्तानुमितिद्वयभिन्नविषयकत्वेन भिन्नविषयकशाब्दबोधं प्रतिअनुमितिसामग्र्याः प्रतिबन्धकत्वात् ।

इत्थञ्च प्रकारतावादिमतेपूर्वोक्तरीत्या कार्यकारणभावप्रयुक्तगौरवस्यसत्त्वेऽपि संसर्गतामते वृत्त्यनियामक सम्बन्धस्याभावप्रतियोगितावच्छेदकत्वकल्पनाप्रयुक्तगौरवस्योक्तरीत्या प्रतिबध्यप्रतिबन्धकभावप्रयुक्तगौरवस्य च सत्वेन राज्ञः पुरुष इत्यादौ स्वत्वादेः प्रकारताभ्युपगमः एव न्याय्यः इतिदिक् ।

संस्कृतसम्मेलनम्

वाणीं भजत गैर्वाणीम्

प्रधानाचार्य पं० श्री फूल कुमार झा ग्रा० पो० मड़ुकिया, मधुवनी

●

शिक्षा न दीक्षा न तथैव भाषा, भूषाऽपिहा हन्त ? न चाऽस्तिदेश्या ।
खाद्यं च पेयं परकीयमेव, सेव्यं यदा स्यात् किमुवाच्यमत्र ॥१॥

तस्माज्जनानां प्रिय नेतृवर्य्याः ? प्राप्ताधिकाराः परिपूर्णशक्त्या ।
महात्मनोऽमुष्य :भवन्त एवं, भाषां संस्कृतं परिचालयन्तु ॥२॥

भाषा विवादः कलहस्य मूलं, देशैक्य नाशी सुचिरात् प्रवृत्तः ।
सर्वं प्रियां संस्कृतमार्य भाषां, प्राचार्य तेषां तमिमं हरन्तु ॥३॥

आंगलीं विदेश-व्यवहार-भाषां, देशैक्य-हतो निंजप्रान्त भाषाः ।
सम्मानयन्तः संस्कृतञ्च भाषा, मेकां लिपिंतु प्रतिपादयन्तु ॥४॥

समस्त भाषा-जननीं पुराणीं, निलिम्पवाणीममरामधीत्य ।
सुताः सुराणा ममृतं पिबन्तो, यथेप्सितं शांतिसुखं लभन्ताम् ॥५॥

स्वपूर्वजानां चरितं स्मरन्ती, प्रेमाऽऽवहन्ती निजसंस्कृतौ च ।
यथोद्धरेत् स्वां जनता भवन्तस्तथाऽऽत्म चारित्र्यमुदाहरन्तु ॥६॥

तेशोऽस्मदीयश्चटका सुवर्ण्या, जगद् गुरुश्चापि पुरैष जातः ।
यथार्थ नामाऽस्त्वधुनापि येन, तथा प्रयासः सफलो विधेयः ॥७॥

भारतेऽद्यतने दीना दुर्दशा ग्रस्त देववाक् ।
राष्ट्रभाषा पदेस्थप्या सर्वैर्भारतवासिभिः ॥८॥

गैर्वाणी वर्द्धतामत्र स्वतन्त्रे भारते सदा ।
स्वाङ्के संलालयन्तीहभाषास्सर्वाहिराजते ॥९॥

●

इन्द्राणी

डॉ० शैलजा पाण्डेय
गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ, प्रयाग

●

सुखसौभाग्यप्रदा इन्द्राणीदेवता देवपत्नीनां मध्ये विश्रुता। वीरपत्नी वीरप्रसू इन्द्राणी स्वयमपि शक्तिस्वरूपास्ति। स्त्रीत्वस्य शक्तेः च मञ्जुलसमन्वयः वर्ततेऽस्याम्। वैदिकवाङ्मये वृषभविशेषणमण्डितस्य इन्द्राणीभर्तुः इन्द्रदेवस्य पौंस्यं वेदज्ञानां कृते सुपरिचितमस्ति। स्ववर्गे पतिरिव इन्द्राण्यपि नारीषु श्रेष्ठा सुभगा वर्तते—

'इन्द्राणीमासु नारिषु सुभगामहमश्रवम्।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः।

(ऋग्वेद, १०।८६।११)

का एषा इन्द्राणी

वेदे इन्द्रपत्नी इन्द्राणी मूलतः इन्द्रस्य शक्तिः, तस्य सेनास्ति।

'अस्य सेनाऽसँशितेव स्यादिन्द्राणी' (तै० सं०, २।२।८।१)

'इन्द्राण्येतु प्रथमाजीतामुषिता पुरः' (अ० वे०, १।२७।२४)

'सेना वा इन्द्रस्य प्रिया जाया' (गो० ब्रा०, २।२।६)

पौराणिककसाहित्ये तस्याः परिचयो नारीरूपेणाधिकतया दृश्यते। इन्द्राणी नास्त्यत्र इन्द्रस्य सेना। तस्याः पितृकुलं स्पष्टं जातम्। पुराणे सा पुलोम्नः असुरस्य पुत्री (ब्रह्म पुराण, ३।८०), देवराजेन्द्रस्य महिषी (विष्णु पुराण, ५।३०।३८) वर्तते। वैदिकसाहित्ये इन्द्राणी वीरजननीरूपेण वर्णिता (ऋग्वेद, १०।८६।६,१०) किन्तु तस्याः पुत्रस्य नामोल्लेखः जयन्तः इति पुराणे एव (हरिवंशपुराण, २।३६।१४) परिलक्ष्यते।

पुनः जिज्ञासा भवति कीदृशीयमिन्द्राणी—

इन्द्राण्याः वैशिष्ट्यम्

इन्द्राणी अनिन्द्यसुन्दरी देव्यासीत्। रूपसम्पन्ना न कापि देवपत्नी तथा प्रसिद्धा यथा इन्द्राणी। ऋग्वेदे सा सम्बोधिता—

'किं सुबाहो स्वंगुरे पृथुष्टो पृथुजाघने'

(ऋग्वेद, १०।८६।८)

सुभगा

पार्वतीमधिकृत्य 'प्रियेषु सौभाग्यसर्वफला हि चारुता' इत्युक्तिभिः कालिदासस्य इन्द्राणीविषयेऽपि चरितार्था जाता। सा इन्द्रस्य प्रिया। सौभाग्यगर्विता सा ऋग्वेदे वक्ति—

'न मत्स्त्री सुभसत्तरा न सुयाशुत्तरा भुवत्।
न मत्प्रति च्यवसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः॥'

(ऋग्वेद, १०।८६।६)

साखण्डसौभाग्यवती नारी, यतो हि—
'नह्यस्या अपरं चन जरसा मरते पतिः'

(ऋग्वेद, १०।८६।११)

इन्द्रः पुरुषेषु उत्कृष्टः अतः इन्द्राण्याहृदये नारीसहजाचिन्ता सपत्नीभयरूपा वर्तते। इन्द्रं प्रति अन्यनारीणामाकर्षणं स्वाभाविकं वर्तते। यथा इन्द्रः अन्यासु सुन्दरीषु आकृष्टः न भवेत् तथा इन्द्राणी चिन्तयतीति परिलक्ष्यते। सा सपत्नीनां विकर्षणायात्मनः आकर्षणाय इन्द्रकृते ओषधिप्रयोगं करोति—

'इमां खनाम्योषधिं वीरुधं बलवत्तमाम्।
यथा सपत्नी बाधते यथा संविदन्ते पतिम्॥'

(ऋग्वेद, १०।१४५।१)

पुराणे एकदा सौभाग्यगर्वितायाः इन्द्राण्याः मानमर्दनं कृष्णप्रियया सत्यभामया कृतम्। इदं वर्णनं स्वर्गात् कृष्णस्य पारिजातहरणप्रसङ्गे (विष्णुपुराण, ५।१०-१५; हरिवंशपुराण, २।१३-१५) वर्तते।

पत्युः सहचरी

सौन्दर्य—कायिकं मानसिकञ्च—वैवाहिकजीवनस्याह्लादकरं प्राणदयकं तत्त्वं भवति। दाम्पत्यजीवने देहसौन्दर्यमाकर्षणस्य कारणं भवति। किन्तु प्राप्ते तु वार्धक्ये तज्जीर्णं भवति। सहचरस्य मनोनुकूलताजन्याकर्षणं दिने दिने नवतामुपैति' सुन्दरी मनोचित्तानुसारिणी भार्या सहजरूपेण पत्युः प्रियतमा भवति। इन्द्राण्याः सौभाग्यस्य मूलकारणं रूपादधिकमिन्द्रस्यानुगमनं प्रतीयते। संघषकाले यदा 'शची' (शक्तिः इन्द्राणी) तेन सह सेनारूपेण (तैत्तरीय संहिता, २।२।८।१) अथर्ववेद, ११-६।४) संगच्छति। शान्तिकाले गृहे वर्तमाना इन्द्राणी इन्द्रमाह्लादयन्ती वर्तते (ऋग्वेद, १०।८६।६), तस्य वीरपुत्रान् जनयति (तत्रैव १०।८६।९,१०)। आपत्तिकालेऽपि सा इन्द्रं न परित्यजति। प्रसिद्धपौराणिके आख्याने इन्द्रपदाभिषिक्तेन नहुषेणाकृष्यमाणापि इन्द्राणी तं नाद्रियमाणा सा पदच्युतपतिमेव स्वीकरोति स्म। देवगुरुणा बृहस्पतिना सह विमर्श्य सा उपायं कृत्वा पुनः स्वपतिं देवाधिपतिसूचके इन्द्रपदे प्रतिष्ठितं करोति (महाभारत, उद्योगपर्व, ११-१८)।

सुखसौभाग्यदायिनी देवता

सुप्रथितयशस्विनीन्द्राणी वेदे सौभाग्यदात्रीदेवीरूपेण स्मृता। शाङ्खायनगृह्यसूत्रे विवाहसंस्कारस्याङ्गरूपेण इन्द्राणीकर्मणः उल्लेखो वर्तते नवपरिणीतायाः प्रथमपतिगृहागमने अस्याः विधानं वर्तते। इन्द्राणीकर्मणि वध्वाः केशं प्रक्षाल्य, तां रक्तवर्णपरिधानेन सुसज्जितं कृत्वा हवनादिः भवति। पुनः सौभाग्यवत्यः स्त्रियः, शाकपिण्डिना सुरया अन्नेन च सह तर्पणं कुर्वन्ति तदनन्तरं नृत्यं भवति (शाङ्खायनगृह्यसूत्र, १।११)। हरिवंशपुराणेऽपि इन्द्राणी सौभाग्यप्रदात्री देवी स्मृता—

'इन्द्राणीमर्चयिष्यन्ती कृतकौतुकमङ्गला'

(हरि० पुराण, २।३१।३४)

भारतीयजनमानसे पतिव्रता दुःखसुखानुगामिनी पत्नी आराध्या भवति। इन्द्राणी पातिव्रत्यस्य मूर्तिमती नारी परिलक्ष्यते। युद्धस्थले पतिमनुगम्यमाना इन्द्राणी सूर्यवंशिनरेशेन दशरथेन सह गच्छन्त्यां कैकेय्यामपि प्रतिबिम्बिता भवति।

कालातिक्रमेण सौभाग्यवतीषु स्पृहणीयायाः सौभाग्यप्रदाया इन्द्राण्याः स्थानं शिवप्रियया पार्वत्या गृहीतम् यथा इन्द्रस्य महत्त्वं पौराणिकदेवैः (ब्रह्माविष्णुमहेशै) गृहीतम्। विवाहकाले गौरीपूजनं सौभाग्याय भवति। अखण्डसौभाग्याय पत्युः दीर्घायुष्याय अधुनापि पतिव्रतायाः पूजनं हरितालिकाव्रते (गौरीपूजने) वटसावित्रीव्रते (सत्यवतः पत्न्याः सावित्र्याः पूजने) भारते प्रचलितं वर्तते। एवंतावत् परिपरायणायाः इन्द्राण्याः परिवर्तितस्वरूपाणि पूजितानि भवन्ति।

कम्प्यूटरनामकयन्त्राय संस्कृत भाषा सर्वथा उपयोगिनी

(३ मार्च १९८६ हिन्दुस्तान दैनिक पत्रे प्रकाशिता वार्ता)

बम्बई २ मार्च (वार्ता)। भारतस्य प्राचीनतमा संस्कृत भाषा कम्प्यूटर यन्त्रस्याधुनिकावश्यकतार्थं विश्वस्य समस्तभाषासु उपयुक्ततमा विद्यते।

अमेरिकादेशीय वैज्ञानिकानां शोधेनेदं तथ्यं प्रत्यक्षं जातम्। ह्यः स्थानीयभारतीयविद्याभवनेन समायोजिते एकस्मिन् समारोहे, विदितमिदं तथ्यं प्रकटयन् उपराष्ट्रपतिः आर० व्यंकटरमन् महाभागोऽकथयत् 'कम्प्यूटरयन्त्राय सर्वाधिकोपयुक्तां भाषां निश्चिन्वानाः कतिपये अमरीकादेशीयाः वैज्ञानिकाः संस्कृतभाषामेव निरधारयन्। तेषां स्वीकारकारणमस्ति यत् संस्कृतभाषा तर्कसङ्गता परिशुद्धा चास्ति।'

देशे संस्कृताध्ययनस्य नवजीवनप्रदानार्थं स्वाभिनिवेशं प्रकटयन् उपराष्ट्रपतिरवदत् 'प्राचीनतमाः संस्कृतग्रन्थाः ज्ञानस्याकराः सन्ति।

—डा० चन्द्रभानु त्रिपाठी

गणेशस्तुतिः

उमारमण झा

श्री केन्द्रीय रणवीर संस्कृत विद्यापीठ शास्त्रीनगर—जम्मूतवी, कश्मीर

भज पशुपतिपुत्रं विघ्नराजं गणेशं
जग-भय-परिहारं, चैकदन्तावतारम् ।
त्रिनयनयुतभालं शङ्करस्यांशरूपं
नम नम शिवदन्तं ज्ञानपुञ्जप्रकाशम् ॥१॥

गणपतिमभिवन्द्यं सर्वदानन्दकन्दं
कनकरुचिररूपं वक्रतुण्डं विचित्रम् ।
धवलकुसुमहारं शोभमानं समानं
सकलमलफलाशं हासमानं गजेन्द्रम् ॥२॥

नगपतिपतिपुत्रो मित्रपुत्रौ कलत्रम्
अवतु भुवि स नाथो दानवारि प्रसन्नः ।
धनजनसुखपूर्णोयः क्षमा नः प्रकर्तम्
स भवतु भवभूत्यै भूरिशोभूविभर्ता ॥३॥

प्रतिपलमतिशोभा राजते यस्य देशे
प्रतिदिनमनुकूलं भासतेऽसौ दयालुः ।
हरति सकलकष्टं स्वजनानामभीष्टं
प्रतिपलमनुदाने धूम्रकेतुः समर्थः ॥४॥

यतोऽज्ञाननाशो विकासोनराणाम्
सुखं चार्थसिद्धिर्ध्रुवं सम्पदाद्या ।
भवन्ति प्रताप-प्रकर्ष-प्रहर्षाः
नतोऽहं गणेशं प्रभुं कीर्तनीयम् ॥५॥

॥ श्रीः ॥

राजस्थानसंस्कृतसाहित्यसम्मेलने

उद्घाटनभाषणम्

(५, ६, ७ मई १९८६)

पं० आद्याचरण झा

भूतपूर्वप्रतिकुलपतिः कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय

मान्याः मुख्यमन्त्रिणः, श्री जोशी महानुभावाः, शिक्षामन्त्रिणः श्री देवपुरा जी महोदयाः, माननीया श्रीमती कमला जी महाभागा, समुपस्थिताः विद्वज्जनशिखामणयः, संस्कृतानुरागिणः सर्वे मान्या अधिकारिणः, भ्रातरो भगिन्यश्च ।

अस्माकं काचिदन्या जगदुपरिलसद्भूत लावण्यवन्या-
धन्याशैलेन्द्रकन्या त्रिभुवनजननी विश्वमान्या वदान्या ।
निःशङ्कं शङ्कराङ्के तडिदिव सहसा प्रोल्लसन्ती हसन्ती
रक्षादक्षा विपक्षावलि विलयकरी शांकरी शं करोतु ।

(१) राजस्थान संस्कृत साहित्य सम्मेलनस्य चतुर्दश वार्षिकोत्सवावसरे शिक्षा परिषदः उद्घाटनं कर्तुं तत्र भवन्तो भवन्तः मां प्रतिनियुज्य यत्सम्मानं प्रदत्तवन्तः तदर्थमहं भृशं नतशिरसा कृतज्ञोऽस्मि ।

(२) इयं तु विडम्बना यदस्याः परिषदः उद्घाटनं कर्तुं यत्र केचन मूर्धन्याः विद्वांसोऽपेक्षिता आसन् तत्र मादृशाऽल्पज्ञानां चयनं जानम् । अहञ्च भवतां कृपाभारेण स्वस्याल्पज्ञताभारेण च अधोमुखःसन्नत्रोपस्थितः । "उद्वाहुरिववामनः" वत् ।

(३) एवं कथयन्त आसन् जनाः यद्राजस्थानस्य भूमिर्मरुभूमिः, भवतु नामात्र पूर्वमद्याप्यांशिकरूपेण तत्र सत्यता, किन्तु संस्कृत-शिक्षा-प्रचार प्रसारार्थं गम्भीर पाण्डित्यार्थं चेयं राजस्थान भूमिरुर्वराभूमिरासीत्, वर्तते च प्रतिक्षणं वर्धमानाऽपि स्थास्यतीति मे निश्चयः ।

(४) इयमेव पवित्रोर्वराशक्तिसम्पन्ना महानगरी याचास्यां शताब्द्यामेव प्रख्यात वेद विदुषांवेदमंत्राणां-वैज्ञानिक दृष्टया समीक्षकानां विद्यावाचस्पति मधुसूदन झा महाभागानां कर्मभूमिस्तथा च तेषामेव प्रमुख पट्ट शिष्याणां म० म० गिरिधरशर्म—चतुर्वेदमहोदयानां तपोभूमिः । एतयोः गुरुशिष्ययोः गम्भीर पाण्डित्येन, वेदमन्त्राणां वैज्ञानिकव्याख्यया तेषां व्यावहारिक परीक्षया च न केवलं भारतराष्ट्रमेव गौरवान्वितं जातं, किन्तु विश्वस्यान्यदेश

अपि विस्मय विमुग्धाः जाताः । अत्रत्य महाराज संस्कृतमहाविद्यालयस्याप्युपलब्धिरपि चिराद्विराजते ।

(५) एतस्मिन् गौरवशालिनि राज्ये शतशः महान्तः चिन्तकाः गम्भीर गवेषकाश्च समभूवन्, सन्ति च । न तत्र प्रमाणस्यावश्यकता विद्यते । विगत एकोनविंशति द्व्यशीति । १९८२ वर्षस्य अक्टूबर मासान्ते अखिलभारतीय--प्राच्य विद्या महासम्मेलनस्यैकत्रिंशदधिवेशने--यादृशी सुव्यवस्थाऽत्र विहिताऽधिकारिभिः सा चिरस्मरणीयाऽनुकरणीया च यतोहि १९४८ ई० वर्षतः प्राच्यविद्या महासम्मेलनस्य चतुर्दशसम्मेलनतोऽह प्रायः सर्वत्र सर्वस्मिन् महासम्मेलने सक्रियरूपेण सपत्नीकं भागं गृहीतवान्--जयपुर सम्मेलन पर्यन्तम् ।

(६) अत्र सखेदं सूच्यते यन्ममधर्मपत्नी विदुषी श्रीमती इन्द्रकला झा ११-२-८४ दिनांके सहसा दिवंगता । फलतः शक्तिरहितोऽयं जनः समुपस्थितः ।

(७) विगतवर्षे राजस्थानशासनस्य तत्कालीन शिक्षा—मन्त्री वर्तमान राजस्वमंत्री श्रीमती कमला महाभागा अन्तरराष्ट्रिय संस्कृत शोधसंस्थानस्य स्थापनार्थं राजस्थानशासनेन संकल्पं कारितवती, सप्तपञ्चवर्षीय योजनायां तदर्थं कियत् कोटिराशीन् निर्धारितवती । एतत्-क्रमे मयासाकमपि शिक्षामन्त्रिमहाभागा पत्राचारं कृतवती । विश्वसिति यत् सा विशाला परियोजना कार्यरूपेत्वरितमेव समागमिष्यति । एषतु नियमो वर्तते यत् शासनस्य कोऽपि संकल्पः कार्ये परिणत एव भवति, भवतुनाम शासकानां परिवर्त्तनं विभागपरिवर्त्तनं वा ।

(८) चिरदिनं यावत् पराधीने भारते संस्कृत विद्वांसो मनीषिणः स्वकीयनिष्ठया, तपसा, श्रमेण, सुदृढ़संकल्पेन चावैतनिकरूपेण, नाममात्रवैतनिकरूपेण वा संस्कृत भाण्डारागार वर्धितवन्तः रक्षितवन्तश्च । शास्त्रीय पाण्डित्यपरंपरां विद्यावैदुष्यं चरित्रनिर्माणं च वर्धयामासुः । दधीचिवदस्थिप्रदायकाः इमे प्रातःस्मरणीयाः सदावन्द्याः । अत्र च पण्डित राजस्येदं सर्वथा समुपयुक्तं पद्यं मह्यम् रोचते ।

तोयैरल्पैरपि करुणया भीमभानौ निदाघे,
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या शमयितुमहो प्रावृषेण्येन वारान्,
धारासारानपि विकिरता विश्वतो वारिदेन ।

(९) राष्ट्रमिदं स्वतन्त्रं जातम् । सहस्रशोदेशप्रेमिणः बलिदानं प्रदत्तवन्तः । अनिर्वचनीयानि कष्टानि सह्यं कृतवन्तोऽस्माकं राष्ट्रनेतारः । ततः स्वतन्त्रताधिगता भारतेन । नात्र तस्य विस्तृत चर्चापेक्षिता । स्वतन्त्रता प्राप्त्यर्थं भारतीय-राष्ट्रिय-कांग्रेसस्यैव-प्रमुख भूमिका त्याग-तपस्या च । यस्य कांग्रेसस्य जन्म बम्बईनगरीस्थ गोकुलदास-तेजपाल संस्कृत महाविद्यालये एव जातम्' । फलतः संस्कृतेन सह कांग्रेस्य जन्य-जनक भावोऽपि सुस्पष्ट एव ।

(१०) किन्तु खेदस्य दुर्भाग्यस्य चायं विषयः यत् जाते स्वातन्त्र्येशब्दस्य विपरीतार्थमेव बहुशोनागरिकाः गृहीतवन्तो गृह्णन्ति च। यत्र स्वतन्त्र—नागरिकस्य स्पष्टमर्थो विद्यते—शालीनता, सहिष्णुता, कार्यदक्षता, समयबद्धता, निजदायित्वनिर्वहणक्षमता च तत्रोद्दण्डतोऽच्छृङ्खलता, स्वकीयनियतकार्यविमुखता प्रतिदिनं विभिन्नान्दोलनेन राष्ट्रमधःकारितादि विपरीतार्थमेव जानन्ति, तदनुरूपमेवाचरन्ति चासंख्यनागराः। वस्तुतः शोचनीयेयं-स्थितिः। प्रतिक्षणं राष्ट्रसंचालकानां शिरोवेदना वदियं स्थितिर्वर्धते एव।

(११) एतत् सन्दर्भे एव भारतीयतायाः, भारतीय संस्कृतेर्मूलस्य संस्कृतस्य यादृशः प्रचार-प्रसारोऽपेक्षित., यादृशनिष्ठायास्तत्परताश्चावश्यकता वर्तते, नतत्सर्वं संजातम्। यद्यपि प्रतिवर्षं विविधरूपेण सस्कृत प्रचारार्थं भारतशासनं यतते, सर्वाणि राज्यशासनानि च यन्तते। व्ययाधिकं च कुर्वते नात्र संस्कृतस्य महत्ताव्यापकतासार्वभौमिकताप्रसंगे किमपि कथनीयं तत्सर्वं तुपिष्टपेषणमेवस्यात् केवलं जाज्वलमानवर्त्तमान स्थिति सम्बन्धे एव काचित् व्यावहारिकी समीक्षा सम्मतिश्च प्रकाश्यते।

(१२) १९५७ ई०वर्षे भारतशासनेन संस्कृतायोगस्य स्थापना कृता, सचायोगः सम्पूर्णे राष्ट्रे भ्रमणं कृत्वा स्वकीयं प्रतिवेदनं ३०-११-५७ दिनाङ्के पञ्चशत पृष्ठात्मके आङ्गलभाषायां विशालं पुस्तकाकारं तत्कालीन भारत-शिक्षामन्त्रि मौलाना अबुलकलाम–'आजाद' महोदयहस्ते समर्पितवान्।

तमेव प्रतिनिवेदनमाधारीकृत्य सर्वप्रथमं वाराणस्यां ततश्च दरभंगायां संस्कृतविश्वविद्यालयस्य स्थापना जाता। कियद्दिन पूर्वमेव उड़ीसा-राज्ये पावन पुरी नगर्यामपि एकः संस्कृत विश्वविद्यालयः सचालितः। श्रूयतेयत् तिरूपतिनगरे, दिल्ली महानगर्यांचाचिरेणैव संस्कृत-विश्वविद्यालयस्य स्थापना संभाविता। तथा च देशे विभिन्न नगरेषु विभिन्न संस्कृत संस्थानस्य च स्थापना जाता—तत्र-तत्र यथासंभवं साधु कार्याणि च भवन्ति नात्र किञ्चित् वैमत्यम्।

(१४) किन्तु संस्कृतस्य यादृश विकासोऽपेक्षितः, यादृश प्रचारोऽपेक्षितः, यादृशशास्त्रीय पाण्डित्यपरम्परारक्षाऽपेक्षिता न तत्सर्वं जातमित्यपि प्रत्यक्षं कटुसत्य च। तत्र किम् कारणम्, कानिकारणानिवेति जिज्ञासायां सन्ति बहवोहेतवः। तत्र कोऽपि हेत्वाभासोऽपि भवितुमर्हति, किन्तु ह्रासे नैकेहेतव इत्यपितथ्यम् ममविचारे।

(१५) प्रायः पञ्चचत्वारिंशद्वर्षाणि यावत् संस्कृताध्ययनाध्यापनेऽन्तिमे भागे १० वर्षाणि यावदुच्च-प्रशासने च संलग्नोऽयमकिञ्चिकरो जनः कानिचित् निम्नोद्धतानि कारणानि मनुते:—

(क) संस्कृतज्ञानांकृते नियोजन सौलभ्याय धिकद्रव्योपार्जनाय—चास्माभिः नवीन संस्कृतशिक्षा पद्धतिः समेकित-पाठ्य-प्रणाली च स्वीकृता। यत्र पाश्चात्यशिक्षादीक्षिताः प्राध्यापकाः अध्यापकाश्च समवेता जाताः। पाश्चात्यशिक्षादीक्षिता-

नांकृते प्राच्यविद्याविशरदाः अल्पज्ञाः असामयिकाः भवन्तीति भ्रमात्मिका धारणा, अद्यापि तेषांमते वर्तते । यद्यपीयंधारणा सर्वथा निर्मूला । अस्यगंभीर-रीत्या भयंकर दुष्परिणामोजातः यत् सामान्य नागरिकाणां मनसि निश्चयो जातो यदाधुनिक विषयाणां ज्ञानेनैवेमे संस्कृतज्ञाः ज्ञानिनोभविष्यन्ति, नियोजनं च लप्स्यन्ते । फलतः शास्त्रीय पाण्डित्यस्य क्रमशोह्रासः जातः आधुनिकविषयाणां वर्चस्वं जातम् । अत्र मूले कुठारः कृतोऽस्माभिः, विशेषतोऽस्याः पंक्तिलेखकोऽपि बिहारराज्येऽन्यैः सह ।

(ख) भारतशासनेन यादृशरीत्या विज्ञानस्य टेकनीकलशिक्षायाश्च तारस्वरेण प्रचारः कृतः येन प्राच्यशिक्षायां विशेषतः शास्त्रीय—चिन्तने च छात्राः विमुखाः जाताः । संस्कृताध्ययने सद्यः फलाभावो दृश्यते जनैः ।

(ग) संस्कृताध्यापकानां मध्ये छात्राणां च मध्ये संस्कृताध्ययनाध्यापने हीनभावनाऽपि समुत्पन्ना या सर्वत्र सुरसामुखवत् व्यापिताव्याप्ता च ।

(घ) प्राय एव संस्कृताध्यापकाश्छात्राश्च स्वकीय प्राचीन वेश-भूषा ग्रहणे सुमुत्सुका । केऽपि स्वनाम्नि—'पण्डित' शब्दं संयोजयितुमपि नोत्सहन्ते । छात्राः कथयन्ति यदहं स्नातकोत्तर वर्गे पठामि नतु आचार्यकक्षायां पठामि इति । विद्यावारिधि—विद्यावाचस्पत्युपाधिं लब्ध्वाऽपि तत्समाः "डॉक्टर" इति कथ्यन्ते विद्वद्भिः । नात्राधिकं वक्तुमीहे—यतो बिभेमि— कटु सत्य कथने तेभ्यस्तथा-कथितप्रगतिवादिभ्यः ।

(ङ) परीक्षायामवैधाचरणेनोपाधिग्रहणार्थं या कदाचारित 'कैन्सर रोगवत्' विस्तृता साऽनिर्वचा मर्मन्तुदपीड़ादायिका च । तमेवोपाधिं गृहीत्वाऽद्य विद्यालये, महाविद्यालये, विश्वविद्यालये च नियुक्तिं लभन्ते । यत्र पाण्डित्यस्य प्रायः कियानंशोऽपि तिष्ठति नवेति संशयः ? यद्यपि सर्वेनैवमित्यपि तथ्यम् । तत्र कियन्तो गम्भीर पाण्डित्य युक्ताश्च । संख्या तेषामल्पीयसी ।

(च) भारतशासनेन त्रिभाषायोजनायां संस्कृतस्य यादृशं नगण्यं स्थानं प्रदत्तं तत्तु संस्कृत शिक्षाह्रासस्य विशिष्टं कारणं विद्यते । संस्कृतस्यातिरिक्तमैच्छिकरूपेण सर्वत्र पठन पाठन व्यवस्था सर्वथा शोचनीया जाता । शतशः सहस्रशश्चैतदर्थं संस्कृतस्य प्राच्यभाषायाः सर्वं विशालसम्मेलनं, महासम्मेलनं; महाधिवेशनं च चीत्कारं कृत्वा प्रस्तावं पारितवन्तः सर्वत्रप्रेषितवन्तश्च, किन्तु परिणामः शून्यमेव ।

(१६) उपर्युक्ता केचिदेव बिन्दवोऽत्र प्रदर्शिताः । इति तु अस्माकं दुर्बलपक्षः । किन्तु नैतेन वयं हताशाः नचोदासीनाश्च । तदर्थं पुनः पुनः प्रयत्नःकरणीय एव । फलंतु दैवाधीनमेव ।

(१७) अधुना संस्कृतशिक्षा प्रसारार्थं शास्त्रीय पाण्डित्यस्य सुरक्षार्थं च किंकरणीयमित्यत्र मम इमे संक्षिप्त विचाराः सादरं परामर्शश्च निम्नोद्धताः :—

(१) सर्वप्रथमं प्रवर्तयिष्यमाणे नवीन-शिक्षापद्धति-निर्माणे संस्कृतस्य समुचितं प्रारम्भिकं स्थानमनिवार्यरूपेण सुरक्षितं यया रीत्यास्यात्तदर्थं वयं संलग्नाः भवेम ।

(A) एतत्प्रसंगे मया स्वकीयः संक्षिप्तो विचारः हिन्दीभाषायामांग्लभाषायां च पुस्तिकाकारे मुद्रापयित्वा विगत जनवरी मासे एव मानवसंसाधन—मन्त्रालये प्रेषितः, न जाने तत्र दष्टिपातोऽपि तेषां जातो न वा ?

(B) दिल्लीस्थ राष्ट्रिय-संस्कृत संस्थानस्य निदेशकं तथा लाल बहादुर शास्त्री संस्कृत विद्यापीठ—प्राचार्य सर्वथा जागरूकं प्रख्यात—संस्कृतसेविनम् डॉ० मण्डनमिश्र महोदयं निकषा पत्रं च मया प्रेषितं यत्समये वयं सावधानाः भवेम ।

(२) राष्ट्रे सर्वेषु संस्कृत विश्वविद्यालयेषु संस्थानेषु यथायोग्यं समानः पाठ्यक्रमः राष्ट्रियस्तरे सम्मिलय विशेषज्ञाः सर्वे निश्चयेयुः यत्र शास्त्रीय ग्रन्थानां समावेशस्तथा भवेत् । येन पाण्डित्य परम्परा—रक्षणं सुनिश्चितं स्यात् । आधुनिक विषयाणामति संक्षिप्तरूपेण समावेशोऽपेक्षितः । अत्र सविस्तरं विचार-विमर्शकाले विस्तृतं स्वविचारं दातुंशक्नोमि यदि तस्यापेक्षा स्यात् ।

(३) संस्कृतोपाधीनां सर्वथा व्यावहारिकरूपेण तुल्यता, मान्यता समकक्षता विधेया याचाधिसूचनायां शासननिर्णयेचास्ति किन्तु व्यावहारिकरूपे न तथा विद्यते । तदर्थं सफलोयत्नोविधेयः ।

(४) स्वनामधन्यो डॉ० आदित्यनाथ झा, आई० सी० एस० महोदयो यदा श्रीमती इन्दिरा गान्धी महाभागायाः सूचना-प्रसारण मन्त्रिकाले सूचना सचिव आसीत् तदा प्रातः प्रतिदिनं पञ्च-मिनट-परिमितात्मकं संस्कृते समाचार प्रसारणस्य व्यवस्थां कारितवान् या चाद्यापि विद्यते । कियद्वर्षानन्तरं श्रीमती गान्धी महाभागा स्वकीय प्रधान-मन्त्रित्वकाले सायन्तनेऽपि पञ्च मिनट-परिमितात्मके समये संस्कृते समाचारप्र-सारण-व्यवस्थां कृतवती याद्यापि प्रचलति ।

तथैवाधुना पुनः दूरदर्शन प्रसारणेऽपि प्रतिदिनं रात्रौ अष्टवादने—नववादने वा पञ्च मिनट-परिमितात्मकमपि संस्कृते मुख्य समाचार प्रसारणं सर्वथाऽपेक्षितं विद्यते । यतोहि बाल-युव वृद्धाः सर्वेऽधुना दूरदर्शनकार्यक्रमें संलिप्ताः सन्ति, स्थास्यन्ति च नात्र कश्चन मतभेदः सन्देहो वा । प्रचारस्य प्रमुख साधनमद्य दूरदर्शनम् ।

(५) अथ च संस्कृतज्ञाः संस्कृतसेविनश्च ज्ञानार्जनार्थं ज्ञानप्रदानार्थं निष्ठया,

भारतीय पद्धत्या तपोनिष्ठया च संस्कृत सेवार्थं तत्पराः स्युः । भवन्तुनाम तत्र कियती आर्थिक क्षतिः । संस्कृतसेवायाः अर्थलाभेन सह संयोजनमेव मौलिकोभ्रम. ।

(१८) एव रीत्याऽन्यरीत्या च पावनेऽस्मिन् जयपुर महानगरे वयं संस्कृतभाषा-शास्त्ररक्षार्थं सङ्कल्पं कुर्याम तथा मा० श्रीमत्याः कमला महाभागायाः सुदृढ़ नेतृत्वे भारतशासनसपीपं सर्वेषां राज्यशासनानां च समीपं सुसंगठितरूपेण समुस्थिताः सन्तो राष्ट्ररक्षार्थं व्यावहारिकरूपेण संस्कृतस्याभ्युन्नतये वयं बद्धपरिकराः यतेम—इति ।

(१९) अन्तेच भूयो भूयः स्वकीयकृतज्ञतां ज्ञापयन् संस्कृत सेवार्थं समर्पितः सन् विरमामि ।

●

आश्रमशुकः

रामस्वरूप शास्त्री

सम्पादकः बालसंस्कृतम्, बम्बई ८६

●

शाखास्वहो ! आश्रमपादपानां वसामिनित्यं वसतौमुनीनाम् ।।
अश्नामि जम्बूनि च दाडिमानि स्वादूनिचाऽऽम्राणि सदायथेच्छेम ।।१।।

गृणामि नामानि शुभानि विष्णोः श्रीकृष्ण गोविन्द हरेमुरारे ।
पदानि चादाय पठद्बटुभ्यः भणामि साधूनि सुभाषितानि ।।२।।

स्वस्थैः प्रसन्नैः शिशुभिर्मुनीनां सहैव खेलामि पठामि चापि ।
क्रीडामि कूर्दामि रमे कुमारैः तिष्ठामि मौनीमुनिभिश्च सायम् ।।३।।

उड्डीय चाऽऽकाशपथे सुदूरं निर्माय सङ्गं मुनिभिः समेतः ।
भ्रमामि चाऽत्राश्रमवीरभाजा शिरःसुतिष्ठामि महीरुहाणाम् ।।४।।

ज्ञानं हि शास्त्राणि विचारयद्भ्यः शृणोमि सूक्तानि पठन्मुनिभ्यः ।
गङ्गां वहन्तीमवगाह्य नित्यम् प्राप्नोमि पुण्यानि गुणार्जितानि ।।५।।

धन्योऽस्मि धन्यैर्मुनिभिः समेतः पुण्योऽस्मि पुण्यैः बटुभिः पठद्भिः ।
लब्धार्थकामोऽस्मि महीरुहेभ्यः प्राप्नोमि कल्याणपरम्परास्ततः ।।६।।

भवन्ति धन्यानि धनानिपुण्यैः धनैः समं सिद्ध्यति सर्वधर्मः ।
सिद्धेषु कामेषुभवन्ति धर्मा धर्मेषु कल्याणपरम्पराः स्युः ।।७।।

धर्मैश्चसिद्ध्यन्ति समस्त कामाः पुण्यैश्च किम् किम् नभवन्तिलोके ।
क्षुद्रोऽपिचेन्मन्दमतिः खगोऽपि प्राप्नोमि सङ्गेनसतांशुभानि ।
कुतो न धीरश्चतुरोमनुष्यः कंकं गुणं नार्हति कांच सिद्धिम् ।।८।।

(मनोरञ्जकः व्यंग्यलेखः)

मम मूर्त्तिमत् पौरुषम्

डॉ० प्रशस्यमित्रः शास्त्री
२९ बी, आनन्दनगर, रायबरेली

तदानीन्तनम् एतद् वृत्तान्तं यदाऽस्माकम् आयुः पञ्चविंशतितमे वर्षे प्राविशत्। अहम् अविवाहितो (न तु ब्रह्मचारी) बभूव। यद्यपि विवाहस्य वार्त्ता यत्र-तत्र चलतिस्म किन्तु कुत्रचिदपि किमपि निश्चितं नाऽभवत।

अस्तु, अस्माकमेव नगरे श्री पं० रामदयालु महोदयोऽपि प्रतिवसति स्म। स नगरस्य प्रख्यातः अधिवक्ता बभूव। तस्यैव एका प्रियंवदा नामधेया रूपवती विवाहयोग्या कन्या आसीत्। प्रियंवदया सार्धमपि अस्माकं विवाहस्य चर्चा तदानीम् प्रवर्तते स्म। प्रियंवदाया गृहे पूर्वमपि यदा कदा मम गमनं भवति स्म किन्तु तया सह विवाहचर्चाऽनन्तरं तत्र गमनाऽऽगमनं किञ्चिदधिकमेव सञ्जातमस्माकम्। प्रायः प्रतिसप्ताहमेव तत्रत्यैः पारिवारिकजनैः परिवृतस्य मम चायपानादिकम् अवश्यं प्रवर्त्तते स्म।

तत्र गमनात् पूर्वं निजवस्त्रेषु पटवासकं निक्षेप्य सुगन्धितं कृत्वा, उपानहौ च चमत्कारेण परिमार्ज्य केशादिकमपि नवविन्यासेनाऽऽकर्षणसक्षमं यदा विरचयामि स्म तदा स्वस्माद् अधिकतरम् अभिरूपं युवानं च पुरुषं संसारेऽस्मिन् कमपि नैव मेने।

यद्यपि साम्प्रतं तु तानि सर्वाणि मूर्खतापूर्णानि कृत्यानि स्मारं स्मारं मया विहस्यते एव।

अस्तु, तस्मिन् दिनेऽपि यथापूर्वम् मम तत्र गमनस्य कार्यक्रमः सुनिश्चितः। मध्याह्नत एव वस्त्रेषु प्रेसं कारयित्वा, पटवासकम्पदार्थं सुगन्धं च निक्षिप्य दर्पणस्य समक्षं वारद्वयम् आत्मानं निपुणतया सज्जीकृत्य सायङ्कालात् प्राग् एव तत्र रिक्शाद्वारा प्रस्थितोऽभूवम्।

अथ सायङ्कालीन चायपानवेलायाम् अहं यदा तत्र समुपस्थितोऽभवं तदा तत्रस्थं दृश्यं विलोक्य विचित्रम् इव किञ्चिद् अनुभूतवान्। मया दृष्टं यत् स्वागत कक्षस्य सर्वाणि वस्तूनि स्वस्थानपरिभ्रष्टानि यत्र तत्र विकीर्णानि दृश्यन्ते स्म। सोफादिकानि समुपवेशनानि च बहिरेव रक्षितानि। सर्वे च तत्र पारिवारिकाः सदस्या उद्विग्नाश्चिन्तामग्नाश्च प्रतीयन्ते स्म। कस्यचिद् हस्ते हाकीदण्डमासीत् पुनरपि स भयभीतो दृष्टः, कस्याश्चिद् ओष्ठयोः लिपस्टिकाऽवलेपेऽपि वदनं रङ्गविहीनमेवाऽभवत्, कश्चिद् भृशं व्याकुलः कम्पमानस्तिष्ठति। यथापूर्वं न तत्र कश्चिदपि हासविन्यासः, नैव विसंवादः, नाऽपि मनोरञ्जनवार्ताः, केवलं 'त्राहि-त्राहि' इत्यात्मकम् एव भयसमन्वितं तत्रत्यं वातावरणं वर्तते।

शनैः शनैः अहं तस्य कारणमपि ज्ञातवान्। वस्तुतः स्वागतकक्षे तस्मिन् न जाने कुतः कश्चित् कृष्णसर्पं आगत्य प्रकटितो बभूव। तथा च केनचित् अचतुरेण आहतः स व्रणितो भूत्वा तत्रैव कुत्रचिद् अन्तर्ध्यानताम् प्राप्तवान्। स आहतः सर्पश्च प्रतिशोधाय पुनः आक्रमणमपि शक्नोति कर्त्तुमिति विचार्य तत्र सर्वे समुस्थिता जनाः चिन्तापरवशा आसन्।

अस्तु, यदैवाऽहं तत्र स्वागतकक्षस्य द्वारे सावधान चेतसा दिदृक्षुरिव मुहुर्मुहुः प्रवेष्टुं प्रारेभे, प्रियंवदा माम् पृष्टवती—"किम् भवान् अपि सर्पाद् बिभेति ?"

स्पष्टमेवाऽऽसीत् यत् सा एतस्य प्रश्नस्य उत्तरसन्दर्भे संभवतः मम मुखात् 'आम्' इत्येवोत्तरं श्रोतुकामा बभूव। अन्यथा इमम् प्रश्नमेव नाऽकरिष्यत्। पुनरपि अहम् अतिविश्वस्तेन स्वरेण उत्तरितवान्—"अरे! अत्र खलु भयस्य का वार्त्ता ?"

तद् आकर्ण्य प्रियंवदाया अपि चक्षुषोः प्रसन्नताजन्या चमत्कृतिरुत्पन्ना जाता। अहमपि स्वकीयेन चोत्तरेण परमसन्तुष्टः सञ्जातः। अथा सा माम् उक्तवती—"सत्यमेव कथितं भवता। यदा किल कस्मिंश्चिद् दिवसे तु मरणम् अपरिहार्यं वर्त्तते तदा सर्पादेव कथं एतावद् भय भवेत् ?"

प्रियंवदायाः वचनं समाकर्ण्य तस्या भ्रातृजाया कथयति—"अपि! प्रियंवदे! किमिदं विचित्रं कथयसि ? प्रत्येकस्तु त्वादृशो निर्भयः साहसी च भवितुं नैव शक्नोति। मम हृदयं तु सर्पस्य नामधेयमपि श्रुत्वा कम्पतेतमाम्।"

एतस्मिन्नेव समये पं० रामदयालु महोदयाः, ये खलु जानुपर्यन्तम् उपानहम्परिधाय हस्ते च स्थूलमेकं दण्डं गृहीत्वा तत्र तं सर्पं निपुणतया सावधानेन मार्गयन्ति स्म, प्रोक्तवन्तः—"भयकारणाद् वस्तुनो निर्भयत्वमपि दुःसाहसिकताम् असमीचीनत्वं च द्योतयति। यदि चास्मिन् समये सर्पो न हनिष्यते तर्हि रात्रौ तु मम चक्षुषि निद्राऽपि नाऽऽगमिष्यति।"

प्रियंवदा—"पितृमहोदयास्तु वस्तुत एव अत्यधिकम् भयभीता दृश्यन्ते।"

तदनन्तरं पं० रामदयालु महोदयो मां सम्बोध्य पृच्छति—"किम् भो! किं भवान् अपि 'सर्पाद् भेतव्यम्' इति पक्षे वर्त्तते ?"

अहञ्च प्रियंवदायाः नेत्रयोः पुनस्तामेव प्रशंसासम्पन्नां चमत्कृतिं द्रष्टुकाम उवाच—"अधुनापर्यन्तं तु भयस्याऽवसरः कदापि मम जीवने न समागतः बहुधाचाऽस्माकं सर्पेण सह साम्मुख्यमपि सञ्जातम् ? पं० रामदयालुः (साश्चर्यम्)—"साम्मुख्यम् अभवत् ? अर्थात् त्वया सह बहुधा तस्य आक्रमणाऽवसरः समुत्पन्नः ? अस्तु, पुनः किम् अभवत् तदा.........?"

अहम् प्रत्युवाच—"अभूत् किम् ?............गृहीतम् मारितं च" मम वचनमाकर्ण्य पं० रामदयालु महोदयः चीत्कारमिव कुर्वाणः प्रोक्तवान्—"गृहीतम्'..........? अर्थात् त्वं विषधरं विषधरं गृहीतवान् ?"

अहम्—"आम् श्रीमन् ! अन्ततः अत्र किम् आश्चर्यकरं वृत्तान्तम् ? सर्पस्य हननाय तु एव एष सर्वोत्तमः उपायो वर्त्तते यत् तस्य पुच्छं सहसा निगृह्य उच्चैः वेगेन च समुत्क्षेपणं (झटकना) करोतु। तथाविधकरणेन चाऽकस्मादेव तस्याऽस्थिभङ्गो भवति येन स सर्पितुम् असमर्थो जायते। सर्पणे चाऽसमर्थः भुजङ्गमः अत्यन्तं सरलतया हन्तुं शक्यते।"

मम तादृशानि वीरतापूर्णानि बचनानि समाकर्ण्य प्रियंवदाया लघुभगिनी माधुरी (मम भाविनी श्याली ?) प्रोक्तवती—"किम् एतद् भवान् कथयति ? सर्पस्य पुच्छमपि कथं शक्यते मुष्टिना निग्रहीतुम् ? अहं तु मृतस्य सर्पस्याऽपि पुच्छं ग्रहीतुं न समर्थाऽस्मि।"

ततः सर्वे तत्र परिवारसदस्या माम् परितः स्थिता आश्चर्यचकिता एव बभूवुः। प्रियंवदा तु तदा माम् अत्यन्तं गौरवान्विताभ्यां नयनाभ्याम् पश्यन्ती तिष्ठति स्म। अहमपि चैतत् तदानीम् अनुभवामि स्म यत् सा मनस्येव महाप्रसन्नत मनुभूय संभवतः एतदेव विचारम् अकरिष्यद् यद् अस्माकं भावी पतिः कीदृशः साहससम्पन्नः निर्भयः पौरुषयुक्तश्च वर्तते।

अस्तु, स्वागतकक्षे शनैः शनैः सोफादिकानि उपवेशनानि पुनः सज्जीकृत्य अस्माभिः सर्वैः तत्रैव समुपविष्टम्। प्रियंवदा च पुनस्ताम् एव चर्चाम् औत्सुक्यवशात् प्रारभमाणा उवाच—"अहो ! भवता तु कथितमेव न हि यत् केन प्रकारेण सर्पस्य पुच्छं गृह्यते।"

अहम् अनायास एव प्रोक्तवान्—"अरे ! न हि काचिदत्र विशिष्टा पद्धतिः विशेषः प्रकारो वा भवति। केवलम् अत्र साहसस्य निर्भयतायाश्च आवश्यकता भवति। अस्माकं तु दृष्टिपथे यदैव कश्चित् सर्पो भवति तदाऽहं झटित्येव तस्य पुच्छं प्रतिगृह्य सहसा समुत्क्षिपामि येन तस्याऽस्थिभङ्गो जायते।"

पं॰ रामदयालुः मम वचनानि श्रुत्वा प्रोवाच—"अहो ! आश्चर्यम् !! अद्भुतो भवताम् एष सर्पमारणविधिः ! प्रशंसार्हः साधुवादपात्रञ्च भवान्"

प्रियंवदा—"भवता कियान् दीर्घकायः सर्पः प्रतिहतः ?"

अहम्—"मीटर-द्विमीटरपर्यन्तं च लम्बमानाः सर्पा बहवो हताः परन्तु एकदा मम भयानकेन नागेन सह साम्मुख्यं सञ्जातम्।"

पं॰ रामदयालुः (साश्चर्यम्)—"किम् उक्तवान् ? नागेन सह !!

अहम्—"आम् श्रीमन् ! अत्यन्तं कृष्णकायः स महानागः मीटरद्वयादप्यधिको लम्बमानः मार्गे एव कुण्डलं कृत्वा मण्डालाकारः सन् महाफणं विधाय फूत्कुरुते स्म। तत्रस्थानां पथिकानां च मध्ये कस्याऽपि हृदये तत्सन्निधौ गमनस्य साहसमपि न प्रवर्त्तते स्म।"

सर्वे—"अहो पुनः किं संवृत्तम् ?"

अहम्—"पूर्वं तु अहमपि तमवलोक्य स्वेदस्नात इव सञ्जातः, किन्तु तत्क्षणमेव

चाऽऽत्मानं सुस्थिरीकृत्य स्वकोटवस्त्रम् उत्तार्य च तस्योपरि सहसैव क्षिप्तवान्। यदैव च स नागः तस्मिन् कोटवस्त्रे व्यस्तः सञ्जातस्तदैवाऽहं सपदि तस्य पार्श्वे गत्वा तस्य पुच्छं दृढं निगृह्य वारद्वयं सबलं समुत्क्षिप्तवान् येन च तस्य कशेरुकायाम् अस्थिभङ्गः सञ्जातः। तदनन्तरं चाऽहं तं प्रस्तरखण्डैः हतवान्।

सर्वे (दीर्घं निःश्वस्य)—"अहो ! आश्चर्यकरम् एतद् वृत्तान्तम् !! भवादृशास्तु निर्भयाः साहससम्पन्नाश्च युवानः धन्याः प्रशंसार्हाश्च।"

अहम्—"तस्य महानागस्य वधवृत्तान्तमाकर्ण्य समीपस्था निवासिनः समागत्य माम् अभिनन्द्य स्वस्कन्धेषु च समारोप्य सोत्साहम् उत्सवम् इव मेनिरे। यतो हि तत्र तेन महानागेन बहवो मानवा दंष्टा आसन्। तथा च.........."

इत्येवम् मयि कथयत्येव सति तत्र भूकम्प इव सञ्जातः। कश्चित् सोफासहितमेव पपात, कश्चित् सोफासनम् आरुह्य स्थितः सन् क्रोष्टुम् आरब्धवान्। पं० रामदयालु महोदयोऽपि द्वारस्थ समीपस्थ कुर्सी-आसनस्योपरि समारुह्य उच्चैः आचुक्रोश—"स निःसृतः...... असौ वर्तते तत्र सर्पः !..........पश्य पुनः कुत्रचित् प्रच्छन्नो न भवेत्.........।

वस्तुतः यस्मिन् पर्यङ्के समुपविश्य तत्राऽहं सर्पविषयकं स्वपराक्रमवर्णनं करोमि स्म, तस्यैव निवाड़वस्त्रेषु क्वचित् स सर्पः प्रविष्टः सन् तिष्ठति स्म यम् अन्वेष्टुकामा हन्तुकामाश्च ते सर्वे पूर्वं तत्परा बभूवुः।

अस्तु, तं कृष्ण सर्पं विलोक्य मम शरीरं कम्पितम् इव सञ्जातम् अहं तु भयाद् उत्प्लुत्य सहसैव प्रियंवदायाः पृष्ठतः समायातः। पूर्वं तु प्रियंवदा ज्ञातवती यदहं सर्पस्य पुच्छं निगृहीतुं संभवतः स्वयुद्धकौशलाऽनुसारं मुद्राविशेषं (पैंतरा) साधयामि किन्तु यदाऽहं तस्याः पृष्ठत एव स्थित्वा किमपि न कृतवान्, अथ चाऽसौसर्पः शनैः शनैः अस्मदभिमुखमेव प्रचलित स्तदा सा प्रोच्चैः क्रुष्ट्वा बभाषे—"पश्यतु तस्य पुच्छं भवान्, कृपया शीघ्रं निगृह्णातु .....समुत्क्षिपतु शीघ्रमेव तत्......."।

एतद्वाक्यान्तं तु मया प्रियंवदाया अन्येषामपि च वाक्यानि कर्णगोचरीकृतानि। तदनन्तरं च शब्दाः शनैः शनैः मम कर्णाभ्यां दूरत इव सञ्जाताः। पुनः किमभूद् इति त्वहं न जानामि किमपि। यदा चेतना समागता तदा अनुभूतवान् यत् अस्माकं चरणौ हिम इव शीतलौ वर्त्तेते। प्रियंवदायाः भृत्यः शनैः शनैः मम पादस्य तालुनी परिमृजन् आस्ते। तेनैव भृत्येन चाऽहं ज्ञातवान् यत् स सर्पस्तु प्रियंवदाद्वारा निहतः। सर्वे च मम मूर्च्छायाः चर्चां कुर्वाणा उपहसन्तः समासते।

अथ क्षणाऽनन्तरं श्री पं० रामदयालु महोदयः मम समीपमागत्य प्रोक्तवान्—"अहो ! समागतं चैतन्यम् ? अनेन सर्पेण तु तवैव पुच्छं तथा समुत्क्षिप्तं यत् सर्वम् आश्चर्यकरमेव संवृत्तम्। पूर्वं तु अस्माभिः ज्ञातं यत् सर्पस्त्वाम् एव दष्टवान् किन्तु यदा चिकित्सकेन आगत्य

प्रोक्तं यत् केवलं भयवशादेवाऽयम् मूर्च्छितः सञ्जातः, तदनन्तरमेव वयं दुश्चिन्तया मुक्ता अभूम" ।

अन्ततः कियत्कालपर्यन्तमहमपि तत्र तूष्णीम् अभविष्यम् ? लज्जाम्परित्यज्य बहुकाठिन्येनैव वक्तुम् आरब्धवान् "नाऽहम् अवगच्छामि किञ्चित्……न जाने सहसा किम् बभूव………मम वचनमाकर्ण्य माधुरी कथयति—"अरे बभूव किम् ! भवान् सर्पमालोक्य भयभीतः सन् मूर्च्छितः सञ्जातः…………अपरं किम्" ?

अस्तु, तस्मिन् दिने मम जीवने यद् हास्यं संवृत्तं संभवतः तत् सर्वं मम भाग्ये एव विधिना लिखितमासीत् । तद्घटनाऽनन्तरं बहुकालेभ्यः पश्चात् यदा प्रियंवदा स्वपत्या सह एकदा अकस्मादेव वाराणस्याः रेलवे स्टेशने मिलितवती तदा स्वपत्या सार्धं मम परिचयं कुर्वाणा एवम् अब्रवीत्— 'एतान् महोदयान् मिलन्तु भवन्त………एते खलु श्रीमन्तः डॉ० प्रशस्यमित्र शास्त्रिणः…… ……अत्यन्तं पराक्रमिणः साहसस्य प्रतिमूर्त्तयः निर्भीकाः पुरुषाश्च ।"

※ साधुवादः ※

संस्कृतप्रचारप्रसारक्रमे भारतीय - आकाशवाणीदिल्ली द्वारा विविधः कार्यक्रमः प्रस्तूयते । एतदर्थं भारत सर्वकारः साधुवादार्हः ।

तथा चैवं पटना आकाशवाणी केन्द्रोऽपि संस्कृत वार्ता—सुरभारती—संस्कृत-नाटकाभिनयादिकार्यक्रमप्रसारेणन सुरभारतीरसिकानां मनांसिरञ्जयति—इति मन्ये । विशेषतः, संस्कृत नाटक प्रसारण निदेशकानां "श्री जनार्दन राय" महोदयानां प्रयासः स्तुत्यः । यतोह्येषां श्रमेण सामाजिकाभिनयेन-शास्त्रीयाभिनयेनोभयोः सामञ्जस्यं स्थापितम् । एतदर्थं श्रीराय महोदयाः साधुवादार्हाः । श्रूयते च चैषामैषम्: सेवा समाप्तिकालः जूनमासः (८६) समुपागतः । स्वकार्य संचालन कौशलेनैषः कार्यावसरः अग्रेऽपि वर्धेत, इत्यपि वाञ्छ्यते । संस्कृतसम्मेलनमेतेषां दीर्घायुष्यं कामयते ।

(चन्द्रदीप शुक्लः)

वि० प्रान्तीय संस्कृत साहित्य सम्मेलन संस्थापकाः

महामहोपाध्यायाः सर्वतन्त्राः विद्वद्वरेण्याः

स्व० पं० श्रीहरिहर कृपालु द्विवेदिमहोदयाः

* संस्कृतसम्मेलनम् *

With Compliments from :

MURARKA

PROPERTIES P. L.

29, STEPHEN HOUSE
4 E, B. R. D. Bagh (EAST)
Calcutta, 700001

Phone : 232030

* संस्कृत जगत् *

(१) समस्त संस्कृत संस्था प्रतिनिधित्वेन संस्कृत समन्वयसमितिः, अयोध्यानगरे संस्कृतोत्सवमगस्त मासस्य १८-१९ तिथयो:, आयोजयति। कार्यक्रमस्य प्रायोजनैनम्–सोम–१८-८-६ सायं संस्कृत सम्पादकसम्मेलनम्। संयोजकः सर्वगन्धासम्पादकः। मंगलवासरे १९-८-८६ सायं संस्कृतसम्मेलनाधिवेशनम्। रात्रौ—अखिल भा० संस्कृत कवि सम्मेलनम्। सम्मेलनेऽस्मिन् सर्वेषाकृते योजना वा सुव्यवस्थानिःशुल्कं भविष्यति। स्व सदस्यता पंजीकरणाय ११) रुप्यकाणि ३१-७-८६ पर्यन्तं कृपयाऽस्मिन् संकेते प्रेषयन्तु। डा० राजदेवः—प्राचार्य साकेतमहाविद्यालयः, अयोध्या।

(२) प्रोत्साहजनकोसमाचारः यद् विहारराज्येनसंस्कृतसाहित्यसम्मेलनेन प्रकाशितस्य "संस्कृतसम्मेलनम्" पत्रस्य विकासार्थमेषमः ८५-८६ वित्तीयवर्षे केन्द्रीय दिल्लीशिक्षाधिकारिणा त्रिसहस्त्राणिरुप्यकानि प्रदत्तानि, तथा च विहार संस्कृतशिक्षा परिषदा सार्द्धद्वयसहस्त्राणिरुप्यकाणि च प्रदत्तानि। एतदर्थंते वस्तुनः धन्यवादीः साधुवादार्हाश्चेति।

(३) इलाहाबाद—उच्चन्यायलये न्यायमूर्ति श्री बनवारीलालयादवमहोदयैः, वाक्कीलकैः (वकील) श्री हरिहरप्रसादत्रिपाठि महोदयैश्च आङ्गलप्रभावत्रऽस्मिन् युगेऽपि संस्कृतभाषायाँ न्यायनिर्णयंवादि–प्रतिवादिविषयोपस्थापनञ्चकृत्वा - अभूतपूर्वमुदाहरणं प्रस्तुतम् इति विशिष्टानुकरणीयकार्यार्थं तौ वस्तुतः विशेष धन्यवादार्हौ। संस्कृतसम्मेलनम् तयोः दीर्घायुष्यं कामयते।

(चन्द्रदीप शुक्लः)

विहार राज्य संस्कृत साहित्य सम्मेलन सचिवेन श्री चन्द्रदीप शुक्लेन शाकुन्तल मुद्रणालये (३४ बलरामपुर हाउस-इलाहाबाद नगरे) त्रैमासिकं संस्कृत सम्मेलनम् मुद्रितं प्रकाशितञ्चेति

(२५ जून, १९८६)